# ॥ अन्नपूर्णाष्टोत्तरशतनामस्तोत्रम् ॥

## ॥ ध्यानम् ॥

सिन्दूराभां त्रिनेत्राममृतशशिकलां खेचरीं रत्नवस्त्रां
पीनोत्तुङ्गस्तनाढ्यामभिनवविलसद्यौवनारम्भरम्याम्।
नानालङ्कारयुक्तां सरसिजनयनामिन्दुसङ्क्रान्तमूर्तिं
देवीं पाशाङ्कुशाढ्यामभयवरकरामन्नपूर्णां नमामि॥

## ॥ स्तोत्रम् ॥

अन्नपूर्णा शिवा देवी भीमा पुष्टिः सरस्वती।
सर्वज्ञा पार्वती दुर्गा शर्वाणी शिववल्लभा॥ १ ॥

वेदविद्या महाविद्या विद्यादात्री विशारदा।
कुमारी त्रिपुरा बाला लक्ष्मीः श्रीर्भयहारिणी॥ २ ॥

भवानी विष्णुजननी ब्रह्मादिजननी तथा।
गणेशजननी शक्तिः कुमारजननी शुभा॥ ३ ॥

भोगप्रदा भगवती भक्ताभीष्टप्रदायिनी।
भवरोगहरा भव्या शुभ्रा परममङ्गला॥ ४ ॥

भवानी चञ्चला गौरी चारुचन्द्रकलाधरा।
विशालाक्षी विश्वमाता विश्ववन्द्या विलासिनी॥ ५ ॥

आर्या कल्याणनिलया रुद्राणी कमलासना।
शुभप्रदा शुभावर्ता वृत्तपीनपयोधरा॥ ६ ॥

अम्बा संहारमथनी मृडानी सर्वमङ्गला।
विष्णुसंसेविता सिद्धा ब्रह्माणी सुरसेविता॥ ७ ॥

परमानन्ददा शान्तिः परमानन्दरूपिणी।
परमानन्दजननी परानन्दप्रदायिनी॥ ८ ॥

परोपकारनिरता परमा भक्तवत्सला।
पूर्णचन्द्राभवदना पूर्णचन्द्रनिभांशुका॥ ९ ॥

शुभलक्षणसम्पन्ना शुभानन्दगुणार्णवा।
शुभसौभाग्यनिलया शुभदा च रतिप्रिया॥ १० ॥

चण्डिका चण्डमथनी चण्डदर्पनिवारिणी।
मार्तण्डनयना साध्वी चन्द्राग्निनयना सती॥ ११ ॥

पुण्डरीकहरा पूर्णा पुण्यदा पुण्यरूपिणी।
मायातीता श्रेष्ठमाया श्रेष्ठधर्मात्मवन्दिता॥ १२ ॥

असृष्टिः सङ्गरहिता सृष्टिहेतुः कपर्दिनी।
वृषारूढा शूलहस्ता स्थितिसंहारकारिणी॥ १३ ॥

मन्दस्मिता स्कन्दमाता शुद्धचित्ता मुनिस्तुता।
महाभगवती दक्षा दक्षाध्वरविनाशिनी॥ १४ ॥

सर्वार्थदात्री सावित्री सदाशिवकुटुम्बिनी।
नित्यसुन्दरसर्वाङ्गी सच्चिदानन्दलक्षणा॥ १५ ॥

नाम्नामष्टोत्तरशतमम्बायाः पुण्यकारणम्।
सर्वसौभाग्यसिद्ध्यर्थं जपनीयं प्रयत्नतः॥ १६ ॥

एतानि दिव्यनामानि श्रुत्वा ध्यात्वा निरन्तरम्।
स्तुत्वा देवीं च सततं सर्वान् कामानवाप्नुयात्॥ १७ ॥

॥ इति श्रीशिवरहस्ये श्री-अन्नपूर्णाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Annapurna_Ashtottara_Shatanama_Stotram.
generated on **August 16, 2026**
Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits